संस्कृत वार्ताः

09.09.2024

सायम् - 06:20

मुख्यवार्ता:

· प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां अबूधाबी-इत्येतस्य युवराज्ञा शेख खालिद-बिन-मोहम्मद-बिन-जायद-अल-नाह्यान इत्यमुना सह द्विपाक्षिक-संवादं विहितवान्।

· विदेशमन्त्री डॉ. एस्. जयशङ्कर: रियाद-नगरे भारत-खाति-सहयोग-परिषद: विदेशमन्त्रिणाम् एकस्मिन उपवेशने भागं गृहीतवान्।

· रक्षामन्त्रालयेन सुखोई-30MKI -इति विमानाय 240-AL-31FP इत्येतेभ्य: वैमानिकीय-इन्धनेभ्य: हिन्दुस्तान-एयरोनॉटिक्स-लिमिटेड इत्यमुना उद्यमेन सह षड्विंशति-सहस्र-कोटि रूप्यकाणाम् एकम् अनुबन्धपत्रं हस्ताक्षरितम्।

· केन्द्रीयवित्तमन्त्रिण: निर्मला-सीतारामन इत्यस्या: आध्यक्षे वस्तुसेवाकरपरिषद: चतु: पञ्चाशत्तमसभा नवदिल्ल्याम् अद्य समनुष्ठिता।

· भारतीय-ऋतु-विज्ञान-विभागेन ओडिसाराज्ये अतिवृष्ट्या: सम्भावनाम् अवलोक्य रक्तवार्णिकी-जन-सञ्चेतना प्रख्यापिता ।

संयुक्तारबामीरातदेश:

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याम् अबूधाबी इत्येतस्य युवराज्ञा शेख खालिद-बिन-मोहम्मद-बिन-जायद-अल-नाह्यान् इत्यमुना सह संवादं विहितवान्। उभौ नेतारौ बहुविधान् भारत-संयुक्तारबअमीरात-सम्बन्धान् सुदृढीकर्तुं नवीनेषु प्रचल्यमानेषु व्यापक-रणनीतिक-सहभागित्वं संवर्धयितुं च विभिन्नेषु पक्षेषु चर्चां साधितवन्तौ। असौ युवराज: राजघट्टे महात्मा-गान्धिवर्याय श्रद्धाञ्जलिं समर्पितवान्। तदनु राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह मेलनं कृतवान्। अवधेयं वर्तते यत् ह्य: अबूधाबी इत्यस्य युवराज: शेख-खालिद-बिन-मोहम्मद-बिन-जायद-अल-नाह्यान् इत्येष: भारतस्य यात्रायां नवदिल्लीं सम्प्राप्तवान्। युवराज: श्व: एकस्य व्यावसायिक-मञ्चस्य समारोहे भागग्रहणाय मुम्बईनगरं प्रति यास्यति।

## विदेशमन्त्री

विदेशमन्त्री डॉ. एस्. जयशङ्कर: रियाद-नगरे भारत-खाति-सहयोग-परिषद: विदेशमन्त्रिणां प्रथमोवेशनावसरे खाति-सहयोग-परिषद: देशानां ब्राजीलस्य च स्वसमकक्षै: सह नैकानि द्विपाक्षिकोपवेशनानि कृतवान्। एतासु चर्चासु द्विपाक्षिक-क्षेत्रीय-वैश्विक-प्रकरणानाम् एका विस्तृत-शृङ्खला सम्मिलिता आसीत्। सऊदीदेशीयेन विदेश-मन्त्रिणा फैजल-बिन-फरहान् इत्यनेन सह उपवेशनावधौ डॉ. जयशङ्कर: द्विपाक्षिक-सम्बन्धानां प्रगते: समीक्षां कृतवान्। सहैव वैश्विक-क्षेत्रीय-प्रकरणयो: विचाराणाम् आदानप्रदानं सञ्जातम्।

कुवैत-देशीयेन विदेशमन्त्रिणा अब्दुल्ला-अली-अल-याह्या इत्यनेन सह डॉ. जयशङ्करस्य चर्चा सद्य:एव कुवैतदेशे सम्पन्नोपवेशनाधारितम् आसीत्। बहरीनदेशस्य विदेशमन्त्रिणा डॉ. अब्दुल्लातिफ-बिन-राशिद-अल-जायनी इत्यनेन सह वार्ताविधौ, द्वौ पक्षौ स्वीय द्विपाक्षिक-सम्बन्धानां–सकारात्मकं मूल्याङ्कनं कृतवन्तौ। ओमानदेशस्य विदेशमन्त्रिणा बद्र-अलबुसैदी इत्यनेन सह वार्ताविधौ, भारतोमानयो: मध्ये रणनीतिकसहमतिं सुदृढीकरणविषये चर्चा जाता।

## रक्षोद्योग:

रक्षामन्त्रालयेन सुखोई-30MKI -इति विमानाय 240-AL-31FP इत्येतेभ्य: वैमानिकीय-इन्धनेभ्य: हिन्दुस्तान-एयरोनॉटिक्स-लिमिटेड इत्यमुना उद्यमेन सह षड्विंशति-सहस्र-कोटि रूप्यकाणाम् एकम् अनुबन्धपत्रं हस्ताक्षरितम्।

## वस्तुसेवाकरपरिषद:

वस्तुसेवाकरपरिषद: चतु:पञ्चाशत्तमसभा नवदिल्ल्याम् अद्य आयोजिता। केन्द्रीयवित्तमन्त्री निर्मला-सीतारामन अस्या: सभाया: अध्यक्षतां कृतवती। अन्तिमा वस्तुसेवाकर-परिषत्सभा अस्मिन् वर्षे जूनमासे आयोजिता, यस्यां सर्वेषु आयस-लौह-स्फटीयन्-धातूनाम् दुग्ध-पेटिकासु द्वादशप्रतिशतं वस्तुसेवाकरस्य एकरूप-मूल्यस्य अनुशंसा कृता आसीत्। परिषदा एतदपि अनुशंसितं यत् भारतीयरेलवेद्वारा सामान्यजनेभ्य: प्रदत्ताः सेवाः, यथा

स्थात्रचिटीकाविक्रयणं, सेवानिवृत्तिकक्षस्य प्रतीक्षालयस्य च सौविध्यम् विद्युत्कोशेन-सञ्चालितयानसेवाः च सम्मिलिताः सन्ति परञ्च एतेषु वस्तुसेवाकर इति न प्रयुज्यते ।

<u>भारतीय-ऋतु-विभाग:</u>

भारतीय-ऋतु-विज्ञान-विभागेन संसूचितं यत् अद्य तटीय-आन्ध्र-प्रदेश-यनम-ओडिशासु अतिवृष्ट्या: सम्भावना वर्तते। सहैव श्व: यावत् पूर्वी-मध्य प्रदेशे छत्तीसगढ़े च अतिवृष्टि: भवितुं शक्यते। आगामि-त्रि-दिवसावधौ नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा राज्येषु अपि अत्यधिक-वृष्टि: भवितुं शक्यते। ऋतुविभागेन अनुमानितं यत् ओडिशा-तेलङ्गाना – दक्षिण-आन्तरिक-कर्नाटक, केरल-माहे इत्येतेषु स्थलेषु अतिवृष्टि: सम्भाव्यते।

<u>बौद्ध-सम्मेलनम्</u>

द्वितीयम् अन्ताराष्ट्रिय-बौद्ध-प्रसारमाध्यम-सम्मेलनम् अस्य मासस्य एकादश दिनाङ्के नवदिल्ल्याम् आयोजयिष्यते। अस्य सम्मेलनस्य शीर्षक: विद्यते-संघर्षम् अपाकर्तुं सतत्-विकासाय च गभीरचिन्तमिति। सम्मेलनस्योद्देश्यं नैतिक-पत्रकारितां गभीरचिन्तनं च वर्धयितुम् अपि च एशियाक्षेत्र उपजीविका-बौद्ध-प्रसारमाध्यमस्य एकस्य अन्तर्जालस्य स्थापनमिति अस्ति। एतस्मिन् सम्मेलने अष्टादश देशानां वार्ताहर-प्रतिनिधय: भागं ग्रहीष्यन्ति।

<u>जम्मू-कश्मीरम्</u>

जम्मूकश्मीरराज्ये अद्य राजौरीजनपदे नियन्त्रण-रेखां निकषा सेनया द्वौ आतङ्कवादिनौ व्यापादितौ। राजौरीजनपदस्य नौशेराया: लामसम्भागे ह्य: रात्रौ गोलिकाप्रहार: जात:। सेना-आतङ्कवादिनो: मध्ये जाते एतस्मिन् सङ्घर्षे अनेके आतङ्कवादिन: व्रणिता: जाता:। ध्येयास्पादं वर्तते यत् अन्धकारे एते आतङ्कवादिन: अवैधरीत्या प्रवेशं कुर्वन्त: आसन्।

भारतामरीकीय-युद्ध-अभ्यास:

राजस्थानस्य बीकानेरजनपदस्य महाजन-फील्डफायरिन्ग-रेन्ज इत्यत्र भारत-अमरीकीय-सेनयो: संयुक्ताभ्यास: अद्य प्रात: सार्ध दशवादने समारब्ध:। एतस्मिन् युद्धाभ्यासे भारतस्य दक्षिणपश्चिमीय-नेतृत्वम् अमरिकाया: च आहत्य द्वादशशतं सैनिका: भागं स्वीकुर्वन्ति।

केन्द्रं-वानरजनितसङ्क्रमणम्

केन्द्रेण देशस्य राज्यानि केन्द्रशासित प्रदेशान् च अनुरोधितवान् यत् तै: वानरजनितसङ्क्रमणस्य प्रकरणानि अन्वेष्टितव्यानि। परीक्षितव्यानि च। केन्द्रीय-स्वास्थ्य-सचिव: अपूर्वचन्द्रा वानरजनित-सङ्क्रमणेन सम्बद्धस्य विश्वस्वास्थ्य-संघटनस्य अन्ताराष्ट्रिय-जन-स्वास्थ्य-आपद: घोषणां कृतवान्। मन्त्रालयेन एकस्यां विज्ञप्तौ सूचितं यत् राज्यस्तरीये जनपदस्तरीय च स्वास्थ्यसौविध्यानां सज्जतायाश्च त्वरितमेव समीक्षा भवितव्या।

भाजपा-ममता:

भाजपेति दलेन पश्चिम बंगस्य आर.जी. कर चिकित्सा महाविद्यालये एकया प्रशिक्षु-चिकित्सिकया सह दुष्कर्मण: हत्यायाः च प्रकरणे निष्पक्ष अन्वेषणं सुनिश्चेतुं पश्चिमबंगालस्य मुख्यमन्त्रिणः ममता बनर्जी इत्यस्याः त्यागपत्रं याचितम्। नवदिल्ल्यां वार्ताहरान् संबोधयता भाजपेतिदलस्य प्रवक्त्रा गौरव भाटिया इत्यनेन महिलाभ्यः सुरक्षा प्रदाने असफलातायै कोलकाता आरक्षी आयुक्तम् पदात् विमोचयितुं अपि उक्तम् । श्री भाटिया उक्तवान् यत् भाजपा दलं पीड़ित परिवाराय न्यायं पश्चिम-बङ्गे च महिलानां सुरक्षां च इच्छति।

आम आदमी पार्टी -हरियाणा

आमआदमीपार्टीतिदलेन अद्य हरियाणा विधानसभानिर्वाचनस्य विंशतिप्रत्याशिनां प्रथमासूची प्रकाशिता। दलेन रोहतक-आसनात् बिजेन्दरहूडा, इन्दुशर्मा च भिवाणी-आसनात् निर्वाचन समरांगणे भविष्यतः।

हेल्थ डायेमिक्सइति

केन्द्रीय-स्वास्थ्य-सचिवः अपूर्व-चन्द्रा अद्य नवदिल्ल्यां द्वाविंशत्यधिक – द्विसहस्रतम-त्रयोविंशत्यधिक-द्विसहस्रतम वर्षयोः हेल्थ-डायनेमिक्स-ऑफ-इण्डिया (इन्फ्रास्ट्रक्चर एण्ड ह्यूमन रिसोर्सेज) इत्येतस्य वार्षिक प्रकाशनस्य विमोचनं कृतवान्। प्रतिवर्षं अनेन प्रकाशनेन एकत्रिंशत्-मार्च पर्यन्तं स्वास्थ्याधारभूत-संरचनासु मानवसंसाधनेषु च व्यापक-दत्तांशः प्रदीयते।

।। इति वार्ताः।।